॥ श्रीः ॥

संगीतराजश्रीभावभट्टविरचितः

# अनूपसंगीतांकुशः ।

अयं ग्रंथः

पुण्यपत्तनस्थपंडितदत्तात्रेयकेशवजोशीत्यभिधेन
यथामति संशोधितः ।

स च

**भालचन्द्रशर्मणा**

आर्यभूषणाख्यमुद्रालये मुद्राक्षरैरंकयित्वा
प्राकाश्यं नीतः ।

शकः १८४१ सन् १९१९

( सर्वेऽधिकाराः स्वायत्तीकृताः )

Printed at the Arya-Bhushan Press, Poona, by
Anant Vinayak Patvardhan
AND
Published by Bhalachandra Sitaram Sukathankar M. A. LL. B.
22 Carnac Road,-Bombay.

# अनूपसंगीतांकुशग्रंथस्य वस्तुसंग्रहः ।


| | पृष्ठांकः |
|---|---|
| **स्वराध्यायः ।** | |
| मंगलाचरणम् ... ... ... | १ |
| नादः ... ... ... ... | १ |
| श्रुतयः ... ... ... ... | २ |
| स्वराः ... ... ... ... | २ |
| ग्रामाः ... ... ... ... | ३ |
| मूर्छनाः ... ... ... ... | ३ |
| षड्जग्रामस्य मूर्छनाः ... ... | ४ |
| मध्यमग्रामस्य मूर्छनाः ... ... | ४ |
| गमकभेदेन मूर्छनाः ... ... | ५ |
| दाक्षिणतर्जनीविचारः ... ... | ६ |
| तर्जन्यंगुलीविचारः ... ... | ६ |
| सोमनाथोक्तवादनप्रकाराः ... | ७ |
| तानाः ... ... ... ... | ११ |
| द्विस्वरतानविवेकः ... ... | १२ |
| त्रिस्वरतानविवेकः ... ... | १३ |
| चतुःस्वरतानाविवेकः ... ... | १३ |
| पंचस्वरतानविवेकः ... ... | १४ |
| षाडवतानाविवेकः ... ... | १३ |
| संपूर्णतानविवेकः ... ... | १४ |
| अलंकाराः ... ... ... | १४ |
| **रागाध्यायः ।** | |
| षट्पुरुषरागाः ... ... ... | १५ |
| षट्रागाणां वरांगनाः ... ... | १५ |
| **भैरवः** ... ... ... | १५ |
| मध्यमादिः ... ... ... | १६ |
| भैरवी ... ... ... ... | १६ |
| बंगाली ... ... ... ... | १६ |
| वराटी ... ... ... ... | १७ |
| सैंधवी ... ... ... ... | १७ |
| **मालवकौशिकः** ... | १७ |
| तोडी ... ... ... ... | १८ |
| संभावती ... ... ... | १८ |
| गौरी ... ... ... ... | १८ |
| गुणक्री ... ... ... ... | १९ |
| ककुभा ... ... ... ... | १९ |
| **हिंदोलः** ... ... ... | १९ |
| वेलावली ... ... ... ... | २० |
| रामकली ... ... ... ... | २० |
| देशाक्षी ... ... ... ... | २० |
| पटमंजरी ... ... ... | २० |
| ललिता ... ... ... ... | २१ |
| **दीपकः** ... ... ... | २१ |
| केदारिका ... ... ... ... | २१ |
| देशी ... ... ... ... | २१ |
| कामोदी ... ... ... ... | २२ |
| नाटिका ... ... ... ... | २२ |
| कर्णाटी ... ... ... ... | २२ |
| **श्रीरागः** ... ... ... | २३ |
| वसंती ... ... ... ... | २३ |
| मालवी ... ... ... ... | २३ |
| मालश्रीः ... ... ... ... | २४ |
| सावेरी ... ... ... ... | २४ |
| धनाश्रिका ... ... ... | २४ |
| **मेघः** ... ... ... ... | २५ |
| मल्लारी ... ... ... ... | २५ |
| देशकारी ... ... ... | २५ |
| भूपाली ... ... ... ... | २५ |
| गुर्जरी ... ... ... ... | २६ |
| टक्का ... ... ... ... | २६ |

॥ श्रीः ॥

# अनूपसंगीतांकुशः ।

## अथ स्वराध्यायः ।

### मङ्गलाचरणम् ।

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

जनार्दनपदाम्भोजं नत्वा राजपदाम्बुजम् ।
सम्यक् ज्ञानप्रबोधार्थं स्मृत्वा सिद्धिविनायकम् ॥ १ ॥
एकां मुद्रामुरीकृत्य सार्थहर्षत्रयात्मिकम् ।
श्रीमदनूपसिंहस्याज्ञया ग्रन्थद्वयं कृतम् ॥ २ ॥
एकोऽनूपविलासाख्योऽनूपरत्नाकरः परः ।
अनूपांकुशनामाऽयं ग्रन्थो निष्पाद्यतेऽधुना ॥ ३ ॥
श्रीमत्संगीतरायेण तानयोगप्रवर्तकः ।
अस्मिन्विचारकाः सन्तु सदसद्व्यक्तिहेतवः ॥ ४ ॥

---

### अथ नादः ।

सरिगमाः पधौ नीति सरिगमाः पधौ नि च ।
सरिगमाः पधौ नीति स्थानत्रयमिदं जगुः ॥ ५ ॥
प्रथमं सप्तकं मन्द्रं द्वितीयं मध्यमं स्मृतम् ।
तृतीयं तारसंज्ञं स्यादेवं स्थानत्रयं मतम् ॥ ६ ॥
मन्द्रादर्धं तु मध्यं स्यान्मध्यार्धं तारसप्तकम् ।
उत्तरोत्तरसंकोचस्त्वाकाशे भवति ध्रुवम् ॥ ७ ॥

समभागप्रकल्पोऽत्र न साधु म[illegible] बुधैः ।
तस्माद्भागास्तु विषमाः कल्पिता भरतादिभिः ॥ ८ ॥
षट्षष्टिश्रुतयोऽत्र स्युः स्थानत्रयसमागमे ।
द्वाविंशतिप्रभेदेन संख्या द्वाविंशतिर्मता ॥ ९ ॥
सप्तस्वरास्त्रयो ग्रामाः श्रुतीनां विंशतिर्मताः ।
द्व्यधिका कथिता तज्ज्ञैः प्रोच्यते श्रुतिलक्षणम् ॥ १० ॥

---

## अथ श्रुतयः ।

स्वरूपमात्रश्रवणान्नादोऽनुरणनं विना ।
श्रुतिरित्युच्यते भेदास्तस्या द्वाविंशतिर्मताः ॥ ११ ॥

---

## अथ स्वराः ।

श्रुत्यनन्तरभावित्वं यस्यानुरणनात्मकः ।
स्निग्धश्च रञ्जकश्चासौ स्वर इत्यभिधीयते ॥ १२ ॥
तीव्राकुमुद्वतीमंदाछंदोवत्यस्तु षड्जगाः ।
दयावती रंजनी च रतिका चर्षभे स्थिताः ॥ १३ ॥
रौद्री क्रोधा च गांधारे वज्रिकाऽथ प्रसारिणी ।
प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ॥ १४ ॥
क्षिती रक्ता च संदीपिन्यालापिन्यथ पंचमे ।
मदंती रोहिणी रम्येत्येता धैवतसंश्रयाः ॥ १५ ॥
उग्रा च क्षोभिणी च द्वे निषादे वसतः श्रुती ।
स रि ग म प ध नि स्यात् षड्जादीनां परा भिदा ॥ १६ ॥
एषा त्रैगुण्यसंजाता षड्जादीनां परा स्थितिः ।
मन्द्रा मध्या च तारा च हृत्कंठशीर्षसंभवा ॥ १७ ॥
मन्द्रा सप्तस्वरैर्ज्ञेया मध्या सप्तस्वरैः स्थितिः ।
तारा सप्तस्वरैर्ज्ञेया त्वेवं स्थानत्रयं मतम् ॥ १८ ॥



मन्द्रतारप्रभेदाभ्यां श्रुतीनां स्याद्गतिर्द्विधा ।
मन्द्रो बिन्दुशिराः प्रोक्तः सरेखस्तार उच्यते ॥ १९ ॥
पूर्वा मन्द्रगतिः प्रोक्ता परा तारा प्रकीर्तिता ।
मन्द्रा मन्द्रतरा चेति परा मन्द्रतमा मता ॥ २० ॥
तारा तारतरा चेति परा तारतमा स्थितिः ।
प्रोक्ता संगीतरायेण स्वराणां षड्विधा गतिः ॥ २१ ॥
एवं द्विधा गतिर्मन्द्रे मध्ये तारेऽपि संमता ।
स्थानत्रयसमायोगान्मूर्छनारंभसंभवः ॥ २२ ॥
तत्र मध्यस्थषड्जेन षड्जग्रामस्य मूर्छना ।
प्रथमारभ्यतेऽन्यास्तु निषादाद्यैरधस्तनैः ॥ २३ ॥
स्युः स्वरैर्मूर्छनाः सप्त षड्जग्रामस्य मूर्छनाः ॥

---

## अथ ग्रामाः ।

ग्रामः स्वरसमूहः स्यान्मूर्छनादेः समाश्रयः ।
तौ द्वौ धरातले तत्र स्यात्षड्जग्राम आदिमः ॥ २४ ॥
द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ॥
षड्जग्रामः स्वचतुर्थे पंचमे श्रुतिसंस्थिते ।
उपान्त्यश्रुतिसंस्थेऽस्मिन्मध्यमग्राम इष्यते ॥ २५ ॥
समग्रामेति संज्ञासौ संजाता ब्रह्मनिर्मिता ।
गीर्वाणकुलसंभूताः षड्जगांधारमध्यमाः ॥ २६ ॥
गंधर्वैर्गीयते ग्रामो गांधारः स्वर्गसंस्थितः ।
शास्त्रे मध्यमसंज्ञः स्याल्लोके षडजस्य संस्थितिः ॥ २७ ॥

---

## अथ मूर्छनाः ।

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्छनेत्युच्यते ग्रामत्रये स्युः सप्त सप्त च ॥ २८ ॥
शुद्धाः स्युः सान्तरोपेतास्तद्द्वयोपेतसंज्ञयोः ।
एवमष्टाविंशतिः स्युर्मूर्छनाः षड्जसम्भवाः ॥ २९ ॥

एवं मध्यमग्रामे स्युरष्टाविंशतिसंख्यया ।
षट्पञ्चाशत्स्युरुभयोरनन्ता मेलसम्भवाः ॥ ३० ॥

---

अथ षड्जग्रामस्य सप्तशुद्धमूर्छनाः ।

१ सा रि ग म प ध नि ।
२ निं सा रि ग म प ध ।
३ धं निं सा रि ग म प ।
४ पं धं निं सा रे ग म ।
५ मं पं धं निं सा रे ग ।
६ गं मं पं धं निं सा रे ।
७ रें गं मं पं धं निं सा ।

मध्यममध्यमारभ्य मध्यमग्राममूर्छना ।
प्रथमान्याः स्वरैरेभिर्गान्धाराद्यैरधस्तनैः ॥ ३१ ॥
षड्जे तूत्तरमन्द्राद्या रजनी चोत्तरायता ।
शुद्धषड्जा मत्सरीकृताश्वक्रान्ताभिरुद्गता ॥ ३२ ॥
सौवीरी मध्यमग्रामे हारिणाश्वा ततः परा ।
स्यात् कलोपनता मध्या मार्गी च पौरवी तथा ॥ ३३ ॥
हृष्यका सप्तमी प्रोक्ता मध्यमग्राममूर्छनाः ।
एवं चतुर्दश प्रोक्ता ग्रामद्वयस्य मूर्छनाः ॥ ३४ ॥
यदा गांधारसंज्ञोऽसौ श्रुतिद्वयं समाश्रयेत् ।
तदूर्ध्वमध्यमस्यैव तदा स सान्तराभिधः ॥ ३५ ॥
यदा निषादसंज्ञकः श्रुतिद्वयं समाश्रयेत् ।
तदूर्ध्वसस्य काकली तदा स कथ्यते बुधैः ॥ ३६ ॥
एतद्भेदद्वयोपेतास्तद्वयोपेतमूर्छनाः ।
एवमष्टाविंशतिः स्युर्भेदाः सग्रामसंभवाः ॥ ३७ ॥



एवं मध्यमग्रामस्य भेदा ऊह्या मनीषिभिः ॥
अथ गमकभेदेन कथ्यन्ते मूर्छना मया ।
स्वरस्य कंपो गमकस्तद्भेदानधुना ब्रुवे ॥ ३८ ॥
प्रतिहतिरंतद्रुतमुच्छलनवतो हतियुगाद्गभीररवः ।
मूर्छना प्रतिहतियुता प्रथमं साधनीया सुसाधकैः ॥ ३९ ॥
समुच्छलनहीना या सा निष्कर्षसंयुता ।
एकादशाद्यंकभेदैः प्रतिहतिरुदाहृता ॥ ४० ॥

सस रिरि गग मम पप धध निनि ।

प्रथमंकं विना निष्कर्षालंकारः ।

सांकामतिहतिस्तर्हि हतिः परामृष्यतेऽधुना ।
हतियुक्तो हतः ख्यातो हतोऽपि द्विविधः स्मृतः ॥ ४१ ॥
घातपातनभेदेन कथितो भावसूरिणा ॥

तथा च पारिजाते—

हतः पूर्वं हताख्यः स्यात्तथैवान्वर्थनामकः ।
या वै हताहताभ्यां स्याद्घातपातावरोहणात् ॥ ४२ ॥
हताहत इति ख्यातो हत्यैकत्र स्वरद्वयम् ।
एकत्र हन्यते यस्तु द्विवारं स द्विराहतः ॥ ४३ ॥
प्रतिहतिः स एव स्यात्कथ्यते भावसूरिणा ॥
यत्रैकहननादूर्ध्वं तत्रैवानाहतः स्वरः ।
अथाहतोऽपि कथितस्ततोऽनाहतः कथम् ॥ ४४ ॥
आहतोऽपि च कथितस्तेषां ज्ञानं कथं भवेत् ।
तेषां ज्ञानमहं वच्मि विज्ञानाय सुधीमताम् ॥ ४५ ॥
घातान्विता च कथिता शुद्धासु मूर्छनासु च ।
निर्घर्षे घातपाताभ्यां सदानंदावरोहणात् ॥ ४६ ॥

सदिषु सप्त घाताः । स तु एकाहतः । एकाहतोऽपि घातपाताभ्यां द्विधा । तंत्र्यारधो हननं घातः । नखेनोर्ध्वहननं पातः । स एव

घातपातः । घातपातशब्दोऽपि मंगलार्थद्योतकः भवात । घातपातो घातध्वंसः । स तु अमङ्गलध्वसक एव गणपतिः । गकारे घातकः । णकारे पातकः । पकारे पातः । तकारे घातः । एवं तंत्र्यां तंत्री-हननेन विध्वंसो भवति ॥

नादोत्पत्तौ घातपाते पातघातेऽपि च निष्कर्षालङ्कारः । घातपाताभ्यां सदानन्दः । गात्रवर्णोऽपि द्विधा त्रिचतुश्चस्वरात्मकः । चतुःस्वरः सदानन्दवत् त्रिस्वरे भेदः । घातपातघातेन पातघातपातेन वा संजायते ॥

हतोत्तरा हताख्योऽपि गमकोन्वर्थनामकः ।
एकत्र हन्यते यस्तु द्विवारं स द्विराहतः ॥ ४७ ॥
आरोहणावरोहाभ्यां द्विविधः परिकीर्तितः ।
एकाहत्याचाहतः स्याद्धतेरनुगमकस्त्वनु ॥ ४८ ॥
हतिर्हतिं विना या स्याद्धतेः सैव तु कीर्त्यते ।
एवं द्वादशधा प्रोक्ता हतिः श्रीभावसूरिणा ॥ ४९ ॥

इति दक्षिणतर्जनी विचारः ।

अन्यदपि च । घातपातघाते घातपाते तर्जनीघाते मध्यमा अथवा तर्जन्यंगुलीविचारः ।

सारिकोपरि तंत्र्यां तु निक्षिप्य वामतर्जनीम् ।
यवमात्रं पूर्वसंस्थां दक्षिणेनाहतिर्भवेत् ॥ ५० ॥
तदा संजायते नादो ऋषभस्तु स एव हि ॥
तया विना यदा घातः कृतो दक्षिणपाणिना ।
स नादोङ्काराख्योऽस्ति स एव सस्वरः स्मृतः ॥ ५१ ॥
प्रथमं तस्य शब्दस्य स स एव हरो हरिः ।
हरिर्नाभिस्थितं ब्रह्म स जगत्यक्षरसंहतिम् ॥ ५२ ॥
प्रथमा स स्वराख्याता द्वितीया रिस्वरात्मिका ।



तृतीया गस्वराख्या चतुर्थी मस्वरात्मिका ॥ ५३ ॥
पंचमी पस्वराख्याता षष्ठी धस्वरसंज्ञिका ।
सप्तमी निस्वरा प्रोक्ता श्रीजनार्दनसूनुना ॥ ५४ ॥
एवमारोहणं कृत्वा व्रजेत्षड्जस्वरं प्रति ।
तथावरोहणं कृत्वा घातपातानुसारतः ॥ ५५ ॥
तदा सा मूर्छना प्रोक्ता व्रजेन्मंद्रं च सस्वरम् ।
सादिकोत्तरमन्द्रा स्यात् स्थानत्रयविभेदिनी ॥ ५६ ॥
सप्तस्वरात्मको मन्द्रः कुलाकुलनियोजितः ।
तत्क्षणात्कुरुते मुक्तिं साधकस्य न संशयः ॥ ५७ ॥
आत्मा सस्वरः प्रोक्तः शिरो रिस्वर उच्यते ।
हस्तौ गांधार एव स्याद्वक्षः स्यान्मध्यमः स्वरः ॥ ५८ ॥
पार्श्वौ पंचम एव स्यात्कटिर्धैवतसंज्ञकः ।
पादौ निषाद एव स्यात्षडंगा मूर्छना भवेत् ॥ ५९ ॥
तस्याः पुरस्क्रिया प्रोक्ता त्वेवं तयोरुभयोरपि ।
मूर्छनायाः पुरश्चर्या शिष्येणाकारयेद्गुरुः ॥ ६० ॥
प्रसाध्य मूर्छनां शुद्धामलङ्काराान्वितामिमाम् ।
अलङ्कारान्विता सेयं त्रिविधा जायते त्वियम् ॥ ६१ ॥
औडुवा षाडवा पूर्णा रागान् सृजति सत्वरम् ।
घाताद्या विषमावृत्तिः समाघातादिका स्मृता ॥ ६२ ॥

---

## अथ सोमनाथसकलकलोक्तलक्षणम् ।

प्रतिहतिरन्तर्द्रुतमुच्छलनवतो हतियुगाद्गभीररवः ॥

हतिस्तु दक्षिणकरव्यापारः । हतिद्वयमपि दक्षिणकरव्यापारः । तदन्तर्गतद्रुतमुच्छलनं दक्षिणकरजन्यं वा वामकरजन्यम् । यदि दक्षिणकरव्यापारस्तर्हि असंभवः । तस्माद्वामकरव्यापारो लक्षणीयः ॥ वामकरतर्जनीं षड्जोपरि संस्थाप्य प्रथमं दक्षिणकरतर्जन्याहतिं विधाय

वामकरतर्जनीं द्रुतमुच्छाल्य कोऽर्थः । ऊर्ध्वं निषादपर्यंत नीत्वा पुनः षड्जपर्यन्तमानीय तस्यैव दक्षिणकरतर्जन्याहतिः प्रतिहतिश्च ॥

सप्तस्वराः परिज्ञेया अंकैश्च सप्तभिः क्रमात् ।
द्विराहतौ स्वराष्टत्तिर्लक्ष्यते सा स्वलक्षणात् ॥ ६३ ॥
षड्जं संहत्य चोच्छाल्य पुनः षड्जं प्रकाशयेत् ।
तर्हि षड्जस्य चैकाङ्कः रुद्राङ्कस्तद्वयेन हि ॥ ६४ ॥
सप्तांको निस्वरोद्योती मध्यगो प्रतिहतिं वदेत् ॥

तस्योदाहरणम् ।

सस रिरि गग पप धध निनि ।

इति प्रतिहतिः ।

द्योतकः पूर्वपर्वाङ्कस्तस्य तस्य स्वरस्य च ।
स्यात्समुच्छलनमिदमाहत्यामपि च ध्रुवम् ॥ ६५ ॥
हतिर्द्वितीया नास्त्येव तस्मात्सस्वर एव हि ।
निसयोर्द्योतकावङ्कौ तस्माद्भेदः प्रतीयते ॥ ६६ ॥

तदुदाहरणम् ।

स रि ग म प ध नि ।

इति आहतिः ।

आहतिः कथिता सद्भिः पूर्वस्वरप्रदर्शनात् ।
षड्जं संवाद्य गमनं निस्वरान्तं यदा भवेत् ॥ ६७ ॥
तदा त्वनुहतिः प्रोक्ता भावभट्टेन धीमता ॥

स रि ग म प ध नि स । स नि ध प म ग रि स ।

इति अनुहतिः ।

हतिं विना स्वरे यत्र यदा प्रतिहतेः क्रिया ।
सैवात्रत्वाहतिः प्रोक्ता श्रीजनार्दनसूनुना ॥ ६८ ॥

इति आहतिः ।

स्वरं संवाद्य प्रथमं गतागतं यदा भवेत् ।
वामहस्तस्य तर्जन्या तदांदोलितो मतः ॥ ६९ ॥



स रि ग म प ध नि ।

इति आंदोलितः ।

गतागतं द्वित्रिवारं गमकं परिकीर्तितम् ॥ ७० ॥

इति गमकम् ।

वामस्यैव करस्यैव कम्पस्तर्जनिकम्पनात् ॥

इति कंपः ।

स एवात्र तर्जनीं स्थाप्य पुरः संसरणं यदा ।
एकाहत्या स्वराणां तत् घर्षणं समुदाहृतम् ॥ ७१ ॥

इति घर्षणम् ।

एकाद्यष्टमपर्यन्तं घर्षणं सा प्लुतिर्भवेत् ॥

इति प्लुतिः ।

घातं कृत्वा स्वरे यस्मिन् घातेन पातमुद्रणम् ।
गमको मुद्रितः ख्यातः क्रिया दक्षिणपाणिजा ॥ ७२ ॥
घातस्य प्रथमकृत्यात् द्वितीयः पातसंभवः ।
घातपातः पुनर्घात इत्यङ्कत्रितयं मतम् ॥ ७३ ॥
अग्रस्याकर्षणं पूर्वं सार्यां तंत्रीप्रकर्षणात् ।
परता कथिता सैव तानभट्टात्मजात्मना ॥ ७४ ॥
तृतीयस्याकर्षणं यत्स्यात् चोचना मता सताम् ।
संघाते या विलंबोऽस्ति स श्रमः कथितो बुधैः ॥ ७५ ॥
आन्दोलार्धं विकर्षः स्यात् पीड्य मुक्तिस्तु पीडिका ।
घात आहतिरेव स्यात् स्पर्शः स्पर्शनमीरितः ॥ ७६ ॥
दृढाहतिस्तु नैम्न्यं स्यात् निजता न उरीकृता ।
द्रुततुर्यांशवेगे ति रिपःस्रवति वेगवान् ॥ ७७ ॥
द्रुततृतीयांशवेगे स्फुरितः स्फुरणाद्भवेत् ।
द्रुतार्द्धेन प्रकंपः स्यात् लीनस्तु द्रुतवेगतः ॥ ७८ ॥
आंदोलितो लघुवेगेन बलिर्वक्रप्रवेगता ।
विश्रांतः त्रिपु स्थानेषु घनध्वननवेगवान् ॥ ७९ ॥

त्रिभिन्नोऽसौ त्रिभिः स्थानैः त्रिभिन्न एव लक्ष्यते ।
बलिरिव ग्रंथिलः कंठ्यः कोमलः कुरुलः स्मृतः ॥ ८० ॥
स्वरमग्रिममाहत्य निवृत्तस्त्वाहतः स्मृतः ।
प्लावितः प्लुतगानेन कंपनं प्लावनाद्भवेत् ॥ ८१ ॥
हृदयंगमहुंकारो गंभीरो हुंफनाद्भवेत् ।
मुखमुद्रेण संभूतो मुद्रितो मुद्रणाद्भवेत् ॥ ८२ ॥
स्वराणां नमनाद्यः स्यान्नामितः परिकीर्तितः ।
उल्लासितः क्रमाद्गच्छन् षड्जादीनुत्तरोत्तरान् ॥ ८३ ॥
एतत्संमिश्रणान्मिश्रः कथितो भरतादिभिः ।
भूरिभेदा मिश्रितस्य नोक्ता गौरवभीतितः ॥ ८४ ॥
दक्षिणांगुलिसंबद्धस्तंत्रीजन्योऽतिनिश्चलः ।
कंपादिरहितत्वेन स्वरः कैवल्यमश्नुते ॥ ८५ ॥
स्वरो हुंशब्दसादृश्यात् हुंकृतः परिकीर्तितः ।
स्फालनज्ञानविज्ञाता ज्ञातमध्यमहस्वरः ॥ ८६ ॥
पुनरग्रे समुद्भूतोऽप्येकास्फालनसंभवः ।
शारीरोऽपि च हुंशब्दो हृन्यस्ते चिबुके भवेत् ॥ ८७ ॥
उन्नतस्थानकं गत्वाथाधो गच्छति यः स्वरः ।
एकस्फालनसंजातश्च्यावितश्च्यवनाद्भवेत् ॥ ८८ ॥
शारीरोऽपि च स विज्ञेयो वदनोत्क्षेपणोद्भवः ।
एकास्फालननादेन सर्वेऽतिबोधमागताः ॥ ८९ ॥
स्वरानष्टावभिवाद्य घर्षणाद्घर्षणो भवेत् ।
अवघर्षणमप्येवं ज्ञेयं तदवघर्षणात् ॥ ९० ॥
विकर्षणं तदेव स्यात् स्वस्थानेऽन्यो विकृष्यते ।
स्वरस्याभिभवं नैम्न्यं गुल्याहुर्मनीषिणः ॥ ९१ ॥
हतः पूर्वहताख्यः स्यात्तथैवान्वर्थनामकः ।
हताहत इति ख्यातो हत्यैकत्रस्वरद्वयात् ॥ ९२ ॥



हतोत्तराहतः ख्यातो गमकोऽन्वर्थनामकः ।
चतुर्थांशो यल्लवोऽसौडुवस्य तिरिपो भवेत् ॥ ९३ ॥
श्रुतिकालविभागेन सोऽयं बहुविधो भवेत् ॥
एकत्र हन्यते यस्तु द्विवारं स द्विराहतः ।
आरोहणावरोहाभ्यां द्विविधः परिकीर्तितः ॥ ९४ ॥
स्वरद्वयमभिव्याप्य वामहस्तांगुलिषु वा ।
भवेदूर्ध्वादधो याति तज्जो ढालुरुदाहृतः ॥ ९५ ॥
स्वरद्वयमभिव्याप्य सुढालुः पूर्ववद्भवेत् ॥
यत्रैकहननादूर्ध्वं तत्रैवानाहतः स्वरः ।
शांतसंज्ञायुतास्ते स्युर्ये स्वराः शांतिसंभवाः ॥ ९६ ॥
हुंफितस्यैकदेशत्वान्मुद्रा सा पृथगुच्यते ॥
अग्रे गत्वा निवृत्तोऽसौ पुनःस्वस्थान एव च ।
पश्चाद्भूत्वा निवृत्तोऽसावग्रस्थानसंज्ञकः ॥ ९७ ॥
एवमभ्यस्य मूर्छा तु गमकान्वितविग्रहाम् ।
पुनस्थाटप्रभेदेन मूर्छनास्थाटसंभवाः ॥ ९८ ॥
एवं बहुविधा भेदाः कथिता भावसूरिणा ॥

---

## अथ तानाः ।

अथ तानप्रभेदानां संहतिः कथ्यतेऽधुना ।
पल्लवेन युतस्तानो योग इत्यभिधीयते ॥ ९९ ॥
एकस्वरादितानानां योगान् ब्रवीमि तान् शृणु ।
कृतज्ञादतचित्तेन तान् सर्वानवधारय ॥ १०० ॥
यस्य कस्य च रागस्य विस्तारोऽयं क्षणाद्भवेत् ॥
स इति प्रथमस्थाने म-रि-सेन समायुतः ।
एकस्वरप्रयोगोऽयं प्रथमः कथितो मया ॥ १०१ ॥
गमकोऽगमको द्वेधा ।
पूर्वमगमकं चोक्त्वा गमकं त्वधुनोच्यते ।
षड्जे घर्षणसंयोगात् स-रि-सेति उदाहृतः ॥ १०२ ॥
एवं गमकयोगेन भूरिभेदा भवंति हि ॥

---

### अथ द्विस्वरतानवि[illegible]कः ।

द्विस्वरं तानमादाय योजयेत्पल्लवेन च ।
सोऽयं भवेत् स-म-रि-स-रि-स-मेति द्वितीयकः ॥ १०३ ॥
घर्षणेन समायुक्तः स-स-रि-रि इति क्रमात् ।
अनुहत्या रिकारः स्यात् घर्षणेन च सेन च ॥ १०४ ॥
रि-स-पल्लवसंयुक्तो द्वितीयः कथितो मया ।
एवं तानद्वयं साध्यं भूरिकम्पप्रभेदतः ॥ १०५ ॥

---

### अथ त्रिस्वरतानविवेकः ।

स-ग-रि-त्रिस्वरस्तानो म-रि-सेन मयोदितः ।
त्रिस्वरः प्रयोगो यो गमकेन युतो यदा ॥ १०६ ॥
स-रि-ग-ग-रि-सेत्येवं घर्षणेन युतः क्रमः ।
स-रि-रि-ग-ग स्वरूपेण स-स-रि-ग-ग-रि-स ॥ १०७ ॥
एवं गमकभेदेन षड्भेदस्त्रिस्वरक्रमः ।
नानारूपप्रभेदास्ते साधनीया विचक्षणैः ॥ १०८ ॥
सरिगमपधनीति मरिसेति क्रमो भवेत् ।
तदा सप्तशतं ताना न्यंता विंशत्यया सह ॥ १०९ ॥
सरिगमपनिधेति मरिसापल्लवो भवेत् ।
तदा सप्तशतं ताना धांता विंशत्यया सह ॥ ११० ॥
सरिगमधनिपेति म-रि-सापल्लवेन वै ।
तदा सप्तशतं तानाः पान्ता विंशत्यया सह ॥ १११ ॥
सरिगपधनिमेति रिसपल्लवसंयुताः ।
मध्यमे घर्षणेनैव भेदाः स्युस्ते तथैव च ॥ ११२ ॥
सरिमपधनिगेति रिसपल्लवसंयुताः ।
गांधारे घर्षणेनैव पूर्ववच्छेदकल्पनम् ॥ ११३ ॥
सगमपधनिरीति सपल्लवयुता यदा ।
पूर्ववच्छेदसंयुक्ताः कथिता भावगुम्फिणा ॥ ११४ ॥



रिगमपधनिसेति सान्ताच्छेदयुता भवेत् ।
संख्यैवं सर्वप्रभेदानां पंचसाहस्रिका भवेत् ॥ ११५ ॥
चत्वारिंशद्युता प्रोक्ता श्रीजनार्दनसूनुना ॥
अंतिमं स्वरमुच्चार्य पूर्वानुच्चारयेत्क्रमात् ।
ते क्रमाः कथितास्तेषां नेत्रांकरामता मता ॥ ११६ ॥
कथितो भावभट्टेन तानयोगस्य विस्तरः ।
रागरागानुसारेण वर्तव्यो योजनक्रमात् ॥ ११७ ॥
सुधीभिस्तमाभाव्यं तत्तद्गमकयोजनात् ॥
विना गमकयोगाच्च कतिचित्तु मयाधुना ।
लिख्यन्ते सुज्ञबोधार्थं तान् शृणुष्व महामते ॥ ११८ ॥

---

### अथ चतुःस्वरतानविवेकः ।

चतुःस्वरप्रभेदास्ते चतुर्विंशतिसंभवाः ।
पूर्वोक्तैः कंपभेदैरनन्ताः प्रभवंति ते ॥ ११९ ॥
पल्लवेन मरीसेन रिसेनापि क्वचित्क्वचित् ।
एवं पल्लवभेदेन त्वनन्तास्ते भवंति हि ॥ १२० ॥

---

### अथ पंचस्वरतानविवेकः ।

अथ पंचस्वरस्तानः पल्लवेन युतो भवेत् ।
आरोहणं तु तानः स्यात्पल्लवस्त्ववरोहणम् ॥ १२१ ॥
सरिगमपतानः स्यात्प्रथमरिसपल्लवः ।
पल्लवाद्यस्वरे प्रोक्तं घर्षणं त्वतिकोमलम् ॥ १२२ ॥
तदा योगाः समाख्याता विशंत्या सहितं शतम् ॥

---

### अथ षाडवतानविवेकः ।

स रि ग म प ध ध प म ग रि स ।
एवं विंशत्या सह सप्तशतं भेदाः ।
अस्यापि तथैव भेदाः । रिगमपधसेति विना पल्लवेन ।

अथ संपूर्णतानाधिकः ।

स रि ग म प ध नि नि ध प म ग रि स।

एवं सप्तस्वराणां तु भेदाः पंचसहस्रकाः ।
चत्वारिंशद्युतास्तेऽपि साधनीया विचक्षणैः ॥ १२३ ॥

---

अथ अलंकाराः ।

क्रमेण स्वरसंदर्भमलंकारं प्रचक्षते ॥

क्रमेण स्वरसंदर्भस्तु मूर्छनायां शब्दतानेषु क्रमेषु च भवेत् । तस्मात्तेऽप्यलंकारत्वमागता इति पारिजातोक्तं लक्षणमसिद्धम् । अतो रत्नाकरोक्तलक्षणमंगीक्रियते । तदेवाह—

विशिष्टवर्णसंदर्भमलंकारं प्रचक्षते ॥
विशिष्टवर्णसंदर्भस्तु अलंकारेष्वेव दृश्यते न तेषु ।
तस्माद्विशिष्टसंदर्भमेवाऽलंकारलक्षणं सिद्धम् ।
अलंक्रियते रागोऽनेनेत्यलंकारः ।*

इतिश्रीसंगीतरायभावभट्टविरचिते श्रीसंगीतानूपांकुशे स्वराध्यायः समाप्तः ।

---

* येथून पुढें ग्रंथकारानें सर्व अलंकार सांगितले आहेत परंतु ते सर्व आधींच अनूपविलास ग्रंथांत आले असल्यानें येथें दिले नाहींत.

# अथ रागाध्यायः ।

श्रीमज्जनार्दनं नत्वा संगीतार्थफलप्रदम् ।
तन्यते भावभट्टेन रागालापनमंजरी ॥ १ ॥
भैरवः कौशिकश्चैव हिंदोलो दीपकस्ततः ।
श्रीरागो मेघरागश्च षडेते पुरुषाः स्मृताः ॥ २ ॥
मध्यमादिर्भैरवी च बंगाली च वराटिका ।
सैंधवी पंचमी प्रोक्ता भैरवस्य वराङ्गनाः ॥ ३ ॥
टोडी खंबावती गौडी गुणक्री ककुभा तथा ।
मालकौशिकरागस्य योषितः पंच कीर्तिताः ॥ ४ ॥
वेलावली च रामक्री देशाक्षी पटमंजरी ।
ललिता पंच संप्रोक्ता हिंदोलस्य वराङ्गनाः ॥ ५ ॥
केदारिका च देशी च कामोदी नाटिका ततः ।
कर्णाटी पंच संप्रोक्ता दीपकस्य वराङ्गनाः ॥ ६ ॥
वसंती मालवी मालश्री सावेरी धनाश्रिका ।
श्रीरागयोषिताः पंच भावभट्टेन कीर्तिताः ॥ ७ ॥
मल्लारी देशकारी च भूपाली गुर्जरी तथा ।
टक्का च पंच मेघस्य योषितः कीर्तिता बुधैः ॥ ८ ॥

---

अथ भैरवः ।

पारिजाते—

भैरवे तु रिपौ न स्तो धादिमे न्यासमध्यमे ।
तत्रोक्तौ तु गनी तीव्रौ कोमलो धैवतः स्मृतः ॥ ९ ॥

---

हृदयप्रकाशे—

संपूर्णो भैरवः प्रोक्तो गांधारादिकमूर्छनः ॥

---

मंजर्याम्—

रिहीनो भैरवः सत्रिः प्रातर्गेयो विशुद्धधीः ॥

---

## अथ मध्यमादिः ।

पारिजाते—

मध्यमादौ धगौ न स्तो मूर्छना मध्यमादिका ।
तत्र त्वंशस्वराः प्रोक्ता रिमनयो मुनीश्वरैः ॥ १० ॥
मत्रिः प्रातरसौ गेया रिधास्ता मध्यमादिका ॥

---

हृदयप्रकाशे—

मध्यमादिर्गहीनत्वात् षाडवा मध्यमादिका ॥

---

## अथ भैरवी ।

पारिजाते—

स स्वरांशग्रहन्यासा भैरवी स्याद्धकोमला ।
रिणारोहे तु पन्यासा पंचमेनोभयोरपि ॥ ११ ॥
षड्जेनाथावरोहे तु सर्वदा सुखदायिनी ।

रत्नाकरे—

धांशन्यासग्रहा तारमन्द्रगांधारशोभिता ।
भैरवी भैरवोपांगं समशेषस्वरा भवेत् ॥ १२ ॥

---

## अथ बंगाली ।

रत्नाकरे—

धन्यासांशग्रहा भाषा बंगाली भिन्नषड्जगा ।
गापन्यासा दीर्घरिमा धगन्द्रोऽद्दीपने भवेत् ॥ १३ ॥

पारिजाते—

बंगाली रिधहीना स्यान्मतीव्रतरसंयुता ।
नितित्रेणापि संयुक्ता सस्वरोत्थितमूर्छना ॥ १४ ॥

---



## अथ वराटी ।

पारिजाते—

अथ शुद्धवराट्यां तु रिगौ कोमलपूर्वकौ ।
गस्तु तीव्रतरो धः स्यात्कोमलस्तीव्रनिस्वरः ॥ १५ ॥
धैवतोद्ग्राहयुक्तायां निमौ न्यासांशकौ स्मृतौ ॥

---

हृदयप्रकाशे—

निमौ तृतीयगातिकौ सदा पूर्णा वराटिका ॥

---

## अथ सैंधवी ।

पारिजाते—

शुद्धमेलोद्भवा पूर्णा धैवतादिकमूर्छना ।
आरोहे गनिवर्ज्या च रागिणी सैंधवी मता ॥ १६ ॥

---

हृदयप्रकाशे—

शुद्धसप्तस्वरे मेले सैंधवी परिगीयते ।
आरोहे गनिवर्ज्या या स्फुरितेन युता मुहुः ॥ १७ ॥

इतिश्रीभावभट्टविरचितायामालापमंजर्यां पंचभार्यासहितो भैरवरागः समाप्तः ।

---

## अथ मालवकौशिकः ।

रत्नाकरे—

कैशिकीजातिजः षड्जग्रहांशांतोऽल्पधैवतः ।
सकाकलीकः षड्जादिमूर्छनारोहिवर्णवान् ॥ १८ ॥
प्रसन्नमध्यालङ्कारो वीरे रौद्रेऽद्भुते रसे ।
विप्रलम्भे प्रयोक्तव्यः शिशिरे प्रहरेऽन्तिमे ॥ १९ ॥
दिनस्य, केशवप्रीत्यै ॥

पारिजाते—

धैवतोद्ग्राहधांशांतो गौरीमेलसमुद्भवः ।
रागो मङ्गलकौशाख्यो धनी यत्र समन्वितौ ॥ २० ॥

---

मंजर्याम्—

एकैकगतिकौ रिधौ निगौ मालवकौशिके ॥

---

## अथ तोडी ।

पारिजाते—

षड्जपूर्वा तु तोडी स्याद्यत्रोक्तौ कोमलौ रिधौ ।
न्यासः स्याद्धैवतस्तस्यां गांधारांशेन शोभिता ॥ २१ ॥
मेनारोहे तु पन्यासा पंचमेनोभयोरपि ॥

---

मंजर्याम्—

प्रसिद्धा रागिणी तोडी एकैकगतिकौ निगौ ॥
मतिका पधकंपाढ्या पूर्णा तोडी मकीर्तिता ॥

---

## अथ खंभावती ।

पारिजाते—

खंभावती पहीना स्यात्कोमलान्वितधैवता ।
गांधारमूर्छनायुक्ता रिणात्यक्तावरोहणे ॥ २२ ॥

---

हृदयप्रकाशे—

धादिः खंभावती पूर्णा रोहणे धैवतोज्झिता ॥

---

## अथ गौरी ।

पारिजाते—

रिस्वरादिस्वरारम्भा रिकोमला धकोमला ।
गतीव्रा सा नितीव्रा च गौरी न्यांसस्वरा मता ॥ २३ ॥



आरोहे गधहीना सा निकम्पनमनोहरा ॥

---

हृदयप्रकाशे—

ऋषभांशा तु गौरी स्यात्पूर्णाऽऽरोहे धगोज्झिता ॥

---

## अथ गुणक्री ।

पारिजाते—

रिधकोमलसंयुक्ता गनिवर्ज्या गुणक्रिया ।
धैवतोद्ग्राहसंयुक्ता क्वचिद्गान्धारसंयुता ॥ २४ ॥

---

## अथ ककुभा ।

पारिजाते—

पंचमोद्ग्राहसंपन्ना धहीना ककुभा मता ।
आरोहे तीव्रगांधाररहिता बुधसंमता ॥ २५ ॥

---

हृदयप्रकाशे—

षड्जादिर्मूर्छना गांशा संपूर्णा ककुभा मता ॥

इतिश्रीभावभट्टविरचितायामालापमंजर्यां पंच-
भार्यासहितो मालवकौशिकरागः समाप्तः ।

---

## अथ हिंदोलः ।

पारिजाते—

हिंदोलेऽथ रिपौ त्याज्यौ कोमलो धैवतो भवेत् ॥

---

मंजर्याम्—

हिंदोलको रिपत्यक्तः त्वेकैकगतिकौ गनी ॥

---

## अथ वेलावली ।

पारिजाते—

वेलावल्यां गनी तीव्रौ मूर्छना चाभिरुद्गता ।
आरोहे मनिहीनायामंशः षड्जो बुधैः स्मृतः ॥ २६ ॥
अवरोहे गवर्ज्यायां क्वचिद्गान्धारमूर्छना ॥

मंजर्याम्—

धत्रिका रिपहीना वा प्रातर्वेलावलीष्टदा ॥

## अथ रामकली ।

पारिजाते—

रिकोमला गतीव्रा या मतीव्रतरसंयुता ।
धकोमला नितीव्रा च ख्याता रामकरीति सा ॥ २७ ॥

हृदयप्रकाशे—

आरोहे मनिहीनास्याद्गांधारादिकमूर्छना ।
धैवतांशा च गन्यासा पूर्णा रामकली मता ॥ २८ ॥

मंजर्याम्—

रामक्री सत्रिका पूर्णा सदा गेया विरागिणी ॥

## अथ देशाक्षी ।

मंजर्याम्—

गत्री रिहीना देशाक्षी प्रातर्गेया विचक्षणैः ॥

## अथ पटमंजरी ।

मंजर्याम्—

सर्वदा पत्रिका पूर्णा राजते पटमंजरी ॥

हृदयप्रकाशे—

धगत्यागादौडुवेषु षड्जादिः पटमंजरी ॥



## अथ ललिता ।

पारिजाते—

या गौरीरागसम्भूता ललिता पंचमोज्झिता ।
सांशोद्ग्राहा तथा मान्ता गीतान्ते सा सुशोभिता ॥ २९ ॥

मंजर्याम्—

धत्री संपूर्णललिता प्रातर्गेया च गायकैः ॥

इतिश्रीभावभट्टविरचितायामालापमंजर्यां पंच-
भार्यासहितो हिंदोलरागः समाप्तः ।

## अथ दीपकरागः ।

पारिजाते—

आरोहे मनिवर्ज्यः स्याद्दीपको मालवोत्थितः ।
गांधारोद्ग्राहसंयुक्तः संन्यासांशविभूषितः ॥ ३० ॥

मंजर्याम्—

संध्याकाले च गातव्यो धत्रिः संपूर्णदीपकः ॥

## अथ केदारिका ।

पारिजाते—

गनी तीव्रौ तु केदार्यां रिधौ न स्तोऽथ गादिमा ॥

मंजर्याम्—

नित्री रिपोना केदारी निशीथे करुणप्रिया ॥

## अथ देशी ।

पारिजाते—

गनी त्याज्यावथारोहे रिधौ यत्र च कोमलौ ।
षड्जादिस्वरसंभूतिर्देश्यामंशस्तु रिः स्मृतः ॥ ३१ ॥

मंजर्याम्—

षहीना रित्रिधा देशी सदा गेया विचक्षणैः ॥

## अथ कामोदी ।

मंजर्याम्—

सत्री संपूर्णा कामोदी गायेत्तुरीययामतः ॥

हृदयप्रकाशे—

मांशा गवर्ज्या कामोदी ऋषभादिरुदाहृता ॥

## अथ नाटिका ।

पारिजाते—

रिस्तु तीव्रतरो यस्यां गांधारस्तीव्रसंज्ञकः ।
धस्तु तीव्रतरः प्रोक्तो निषादस्तीव्रनामकः ॥ ३२ ॥
नाटिकायां नावरोहे धगौ, रिस्वरमूर्छना ॥

## अथ कर्णाटी ।

हृदयप्रकाशे—

गैकस्तीव्रतरे मेळे कर्णाटी रागिणी शुभा ॥

मंजर्याम्—

नित्री रिधाभ्यां हीना वा कर्णाटी सायमिष्टदा ॥

पारिजाते—

तीव्रगांधारसंपन्ना मध्यमोद्ग्राहधान्तिमा ।
सांशस्वरेण संयुक्ता कर्णाटी सा विराजते ॥ ३३ ॥
इतिश्रीभावभट्टविरचितायामालापमंजर्यां पंच-
भार्यासहितो दीपकरागः समाप्तः ।



## अथ श्रीरागः ।

पारिजाते—

रित्रयोद्ग्राहसंयुक्तः षड्जोद्ग्राहोऽथवा मतः ।
श्रीरागस्तीव्रगांधार आरोहे गधवर्जितः ॥ ३४ ॥

हृदयप्रकाशे—

संपूर्ण ऋषभादिः स्यादारोहे गधवर्जितः ।
रिपंचमांशः श्रीरागः सान्तः कंपेन शोभितः ॥ ३५ ॥

मंजर्याम्—

धरिन्येकैकगतिका गस्तृतीयगतिर्यदा ।
श्रीरागमेल एष स्यात् श्रीरागाद्या ह्यनेकशः ॥ ३६ ॥
श्रीरागः सत्रिकः सायं धगोनः श्रीरसप्रियः ॥

## अथ वसंती ।

पारिजाते—

षड्जादिमूर्छना मान्ता गनितीव्रा वसंतिका ॥

हृदयप्रकाशे—

आरोहे पोज्झिता माद्या पूर्णा धांशा वसन्तिका ॥

मंजर्याम्—

सत्री वसंतिका पूर्णा प्रातर्गेयाऽप्यनंददा ॥

## अथ मालवी ।

सत्री उ निविहीना वा सायं मालवि गीयते ॥

## अथ मालश्री ।

पारिजाते—

रिहीना मालवश्रीः स्याच्छुद्धमेलस्वरोद्भवा ।
मध्यमादिस्वरोद्ग्राहा धांशयुक्ताऽन्त्यपा स्मृता ॥ ३७ ॥

---

हृदयप्रकाशे—

रिधत्यागादौडुवेषु मालश्रीर्गादिरिष्यते ॥

---

सत्रिधा रिधवर्ज्या च मालश्रीः पातरेव हि ॥

---

## अथ सावेरी ।

पारिजाते—

सावेरी तीव्रगांधारा धैवतोद्ग्राहसंभवा ।
मध्यमांशा रिहीना चारोहणे गनिवर्जिता ॥ ३८ ॥

---

मंजर्याम्—

सपवर्ज्या च सावेरी धत्रिका प्रातरिष्टदा ॥

---

## अथ धनाश्रिका ।

पारिजाते—

आरोहे रिधहीना स्यात्पूर्णा शुद्धस्वरैर्युता ।
गांधारस्वरपूर्वा स्याद्धनाश्रीर्मध्यमान्तिका ॥ ३९ ॥

---

मंजर्याम्—

सत्रिका रिधवर्ज्या च धन्नासी प्रातरेव हि ॥

---

हृदयप्रकाशे—

गमौ तीव्रतरौ यत्र रिधौ कोमलसंज्ञकौ ।
निषादः काकली पूर्णा धनाश्रीस्तत्र कीर्तिता ॥ ४० ॥

इतिश्रीभावभट्टविरचितायामालापमंजर्यां पंच-
मार्यासहितः श्रीराग समाप्तः ।

---



## अथ मेघः ।

हृदयप्रकाशे—

गधैवतनिषादास्तु यत्र तीव्रस्वराः कृताः ।
तत्र मेले भवेन्मेघो रागः संपूर्ण उच्यते ॥ ४१ ॥

---

## अथ मल्लारी ।

पारिजाते—

गौरीमेलसमुद्भूता मल्लारी निस्वरोज्झिता ।
आरोहणे गहीना स्यात् षड्जादिस्वरसंभवा ॥ ४२ ॥

---

मंजर्याम्—

धत्री सपाभ्यां हीना सा मल्लारी ह्युषसि प्रिया ॥

---

## अथ देशकारी ।

मंजर्याम्—

देशकार्यपराह्णे स्यात्सत्री संपूर्णिका भवेत् ॥

---

हृदयप्रकाशे—

गनिशून्या मध्यमांशा देशकारी तथौडुवा ॥

---

पारिजाते—

देशकार्यां गनी तीव्रौ धांशो धादिकमूर्छना ॥

## अथ भूपाली ।

पारिजाते—

मनिवर्ज्या तु भूपाली रिधौ यत्र च कोमलौ ॥

---

हृदयप्रकाशे—

मनित्यागादौडुवेषु भूपाली गादिरिष्यते ॥

---

DEPARTMENTAL LIBR
6 AUG 1952

मंजर्याम्—

सत्रिर्मनिभ्यां हीना च भूपाली प्रातरुत्तमा ॥

अथ गुर्जरी ।

मंजर्याम्—

रित्रिका पेन हीना वा गुर्जरी प्रातरिष्टदा ॥

अथ टक्का ।

मंजर्याम्—

सायं स्यात्सत्रिका टक्का काकल्यंतरराजिता ।

पारिजाते—

रिधौ तु कोमलौ ज्ञेयावाभीरीमूर्छनायुता ॥ ३३ ॥

---

आरोहे च धवर्ज्या सा रागिणी टक्काभिनामिका ॥

इतिश्रीभावभट्टविरचितायामालापमंजर्यां पंचभार्यासहितो मेघरागः समाप्तः ।

इतिश्रीसंगीतरायभावभट्टविरचिते श्रीसंगीतानूपांकुशे रागाध्यायः समाप्तः ।

---

इतिश्रीमद्राठोडकुलदिनकरमहाराजाधिराजश्रीकर्णसिंहात्मजजयश्रीविराजमानचतुःसमुद्रमुद्रावच्छिन्नमेदिनीप्रतिपालनवदान्यतातिशयानिर्जितचिंतामणिस्वप्रतापतापितारिवर्गधर्मावतारश्रीमहाराजाधिराजश्रीमदनूपसिंहप्रमोदितश्रीमहामहेंद्रमौलिमुकुटरत्नकिरणनीराजितचरणकमलश्रीसाहिजहांसभामंडलमंडनसंगीतराजजनार्दनभट्टांगजानुष्टुपचक्रवर्तिसंगीतराजभावभट्टविरचितः श्रीसंगीतानूपांकुशग्रंथः समाप्तः ।

N 82 D
150552

शुभमस्तु ।

UNIVERSITY LIBRARY
15 DEC 1951